# CENTRAL LIBRARY, BARODA.

## SANSKRIT SECTION.

Acc. No. 11580 Subject वल्लभमत

Name संप्रदायप्रदीप

Author द्विवेदिगद.

Age 1610 D.C सं. Extent 44 १.००

Language S Script N

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajigunj Tower,
BARODA - 390 002.

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajigunj Tower,
BARODA - 390 002.

केचित्कल्पाः सात्विकाः केचिद्राजसाः केचित्तामसाः सात्विकेषु विष्णोः स्फूर्तिर्भवति राजसेषु ब्रह्मणः
स्फूर्तिः रुद्रस्तामसेषु कदाचिद्भगवत्याः स्वेच्छ पुराणेष्वेवमनेकधा दृश्यते तत्रास्मै विरोधः तत्रैषश्वे
३ तवाराहकल्पाख्यब्रह्मणो दिवसे षण्मन्वन्तराण्यतीतानि स्वायंभुवः १ स्वारोचिषः २ तमः ३
तामसः ४ रैवतः ५ चाक्षुषः ६ अतीताः षडेते मनवः वैवस्वतो वर्तमानः सप्तमः अथ भविष्याः
सावर्णिः ८ दक्षसावर्णिः ९ ब्रह्मसावर्णिः १० धर्मसावर्णिः ११ रुद्रसावर्णिः १२ देवसाव
र्णिः १३ इंद्रसावर्णिश्चतुर्दश १४ तपः सत्यं दयादानमिति चत्वारः पादधर्मः कृतयुगे बभूव त्रेतायां वि
पात् द्वापरे द्विपात् कलावेकपात् ब्रह्मक्षत्रियवैश्यशूद्रा इति वर्णाः ब्रह्मचारिगृहस्थवानप्र ३
ऽस्थयतय इत्याश्रमाः एषां नित्यनैमित्तिककाम्यादिभेदेन धर्मा वेदेनोक्ताः अथ युगमन्वंतरे भ

गवदवतारो भवति प्रतिमन्वंतरं पृथगिंद्राः सप्तर्षयश्च इंद्रानुयायिनो देवाश्च मनुपुत्राश्च राजानः
वेदादिशास्त्रप्रवर्तकाः ऋषयः त्रिलोकीशास्तारश्चेंद्राः अथ धर्मिचातको भगवदवतारः दंडनीत्या
धर्मपालका राजानः अथ मन्वंतरे प्रति द्वापरे एकसप्ततिर्वेदव्यासा भवंति अस्मिन्श्वेतवाराहकल्पे
वैवस्वतमन्वंतरेऽष्टाविंशतिमे द्वापरे पराशरात्मजः सत्यवतीनंदनः कृष्णद्वैपायनो बभूव।
येन वेदा व्यस्ताः कृतं च वेदान्तशास्त्रं महाभारतं च श्रीभागवतं च तस्मात् वेदव्यासमतमाश्रित्य
द्वापरांतः इदानींतना अपि धर्मार्थकाममोक्षात् हरिभक्तिरिति पुरुषार्थपंचकं प्रवर्तयंति कृतादिद्वा
परांतं धर्मार्थकाममोक्षाणां प्रवृत्तिः कलौ हरिभक्तिरेव पुरुषार्थः धर्मश्चैकपात् कृते त्रेतायां अ
न्येषामृषीणां मतमाश्रित्य धर्मादय आसन् अन्येषामवताराणां मत्स्यकच्छपनरसिंहरामादीनांऽभा

क्लिः कलौकृष्णस्यभक्तिरेव वेदव्यासस्याभीष्टदेवतत्वात् कलौदेवोमहेश्वरः कलौचंडिविनायकौ क
लौरामेतिकीर्त्तनइतिपुराणादिषु यद्यप्येतेनमत्स्यपुराणेनायंकलिः अन्येतेकलयः भूताः भविष्याः
४ श्वेतवाराहकल्पेवैवस्वतमन्वंतरेष्टाविंशतितमकलिविषयंब्रह्मांडपुराणोक्तं द्रष्टव्यं कलौदशस
हस्रेणविश्वस्यपत्यतिमेदिनी तदर्द्धेनाह्नवीतोयंतदर्द्धे सर्वदेवताः १ कृतादिद्वापरांतेयेवेदोक्ता
वर्णाश्रमेतरधर्मपराबभूवुः तेषांधर्मस्त्रिधाफलेभिन्नः येस्वधर्मेह्योग्याधारः स्वर्गाधमिलाषि
णः कलेरादितनसमाप्तिपर्यंतेस्वर्गसुखंभोक्ष्यंति येमुमुक्षवस्तेनिःकामस्वधर्मतोवैराग्यपूर्वक
ज्ञानयोगेनसांख्यवेदांतयोगशास्त्रैवैष्णवधर्मोक्तमार्गेणनाद्याविधंमोक्षंप्राप्ताः येत्वेतत्कलेर्गुण
ज्ञाः कलेराद्यसहस्रवर्षमध्येवतारमिच्छंति यथोक्तंश्रीभागवतेएकादशस्कंधे कलिंसभाजयंत्या ४

र्यागुणज्ञाः सारभागिनः यत्रसंकीर्तनेनैवसर्वःस्वार्थोभिलभ्यते कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतो
मखैः द्वापरेपरिचर्यायांकलौतद्धरिकीर्तनात् कलेर्दोषनिधेराजन्नस्तिह्येकोमहान्गुणः कीर्त
नादेवकृष्णस्यमुक्तसंगः परंव्रजेत् १ तत्रैव कृतादिषुप्रजाराजन्कलाविच्छंतिसंभवं कलौखलुभ
विष्यंतिनारायणपरायणाः क्वचिन्महाराजद्रविडेषुचभूरिशः ताम्रपर्णीनदीयत्रकृतमाला
पयस्विनी कावेरीचमहापुण्याप्रतीचीचमहानदी येपिबंतिजलंतासांमनुजामनुजेश्वर प्रा
योभक्ताभगवतिवासुदेवेमलाशयाः वेदोक्तयज्ञभागभुजोदेवाः ब्रह्मरुद्रयाक्षिगणपतिवा
स्वादित्यसाध्यविश्वेदेवादयोब्रह्मांडपुराणोक्त कालेपावन्निहंति कलौगंगाचोत्कलदेशेसिंधुती
रे पुरुषोत्तमक्षेत्रेश्रीजगन्नाथरूपेणविष्णुस्थलावत्कालेकलौवैस्वयंप्रवतरंति श्रीकृष्णादय

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA-390 002.

देवताभक्तस्यनरकलौसिद्धिर्नभवति मृन्मयेस्प्राहूर्णिकवत् धर्मस्यसिद्धिस्तादृशीनभवति धर्मस्य
कपादत्वात् तस्मात्पृथ्वीतेप्रीवल्लभेः सर्वमास्तेषुनष्टेषुकलौचवलधर्माणि पर्वेदप्रचुरेलोकेकु
५ सपवगतिर्मम ननेकपालकाम्लेच्छलौकिकाद्योबहवः पाषंडावेदमार्गाद्दहिः कलौभवंतिनि
रपदाः यथोक्तंविष्णुपुराणे धर्मांतरे कृतादिद्वापरांतेचजन्मभाजोहिनेतवः भवंतिजन्मभा
जस्तेयावत्कालंकलिर्वर्तेत् भवंतियेकलौजीवास्तेवैनिरयगामिनः कृतादिद्वापरांतेवैकाले
नास्त्यत्रसंशयः २ कलेरादौदशसहस्रवर्षमध्येवर्तीस्त्रियाजेतवोभवंति कर्मणामनसावा
चाप्रीकृस्तेहिभजेतिये संप्रदायिगुरोर्वाक्यात्तेविसार्नकलेर्नराः इतिस्कंदपुराणात् वेदोक्तध
र्महीनत्वात् सर्वेनिरयगामिनः अनाश्रित्यहरिंजीवाःकलौपाषंडसंकुले केचिद्धिसाःपदंयांति ५

तिधर्मस्यैकपदाश्रयेणस्वर्गेबहूनांमध्येकोपियास्यति अन्येसर्वेपिनिरयगामिनः इतिवैविष्णु
क्तं यथोक्तंब्रह्मवैवर्ते एवाकारः कलिर्ज्ञेयःकालरूपेणकेवले सपृच्छत्तयथोक्तेयाः पृच्छेपु
च्छ इतिः स्मृतं आद्यंदशसहस्रेतत्पवरूपंप्रकीर्त्तितं नहर्हेपृच्छसंतंस्यात्कलिकालेतनीरसंल
क्षाधिकोल्पसत्वस्तुद्यादावेतेयवोभवेत् सत्वाधिकोमध्यभागेपृच्छेसारांशवर्त्तितः एवमा
दिकलिर्द्दिशीधर्मस्तानोदिवेयतः गतःसत्कसोधर्मस्यग्लानिरासीत्क्रमात्ततः पंचवर्षसह
स्रांतेएवंमध्यंप्रकीर्त्तितं सधर्मोभगवद्भक्तिस्ततःकालेनवर्द्धते तत्लोवर्षाश्रुतस्यांतेयवस्यांतेव
र्द्धतिहि तत्रभक्तिस्तुधर्मस्तुक्रमाद्वंतेत्रनिष्यति ८ पुष्करादीनितीर्थानिगंगाद्याः सरितस्तथा स
प्तपर्यस्तुपौलेंद्राश्चगम्यामात्रेषुस्ततः ९ भविष्यंतिकलौघोरेस्याद्यवर्षाश्रुतात्परं रक्तांसितेषु

स्यास्येतिदुरुच्छाप्रादुरूपतः ८ एवंश्रीमत्स्वपगुपिच्छिरराज्यसमयात् दर्शसहस्रवर्षपर्यंतेकलौभा
गवताभवंतीतिसिद्धं नत्तुवर्णाश्रमोक्तनित्यनैमित्तिककर्मविधानस्यैकलौभागवतानांतदकरणप्र
६ त्यवायोनस्यात्तुवाभविष्यति नस्यादितिश्रीभागवतेएकादशस्कंधेकलिविषयेवाक्यानि देव
र्षिभूतात्मनृणांचकिंकरोनविद्यतेनायमृणीचराजन् सर्वात्मनायःशरणंशरण्यंगतोमुकुंदं
परिहृत्यकृत्यं १ तत्रैवतावत्कर्माणिकुर्वीतननिर्विद्येतयावता मत्कथाश्रवणादौवाश्रद्धा
यावन्नजायते २ पुनश्च ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वाचरे
दविधिगोचरः ३ बुद्धिःश्वैनिषिद्धाचरणेनैवाचरंतिभागवताः परंतुईश्वरेच्छयानिषिद्धाचर ६
णेईश्वरशरणागतानांईश्वरएवप्रत्यवायंनिवारयति यथोक्तंभगवद्गीतासु ईश्वरःसर्वभूता।

नांहृद्देशेऽर्जुनतिष्ठति भ्रामयन्सर्वभूतानियंत्रारूढानिमायया तमेवशरणंगच्छसर्वभावेनभारत
तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतं मत्तोन्यमीश्वरंज्ञास्यतीतिमत्वापुनर्भगवतोक्तं मन्म
नाभवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे सर्वधर्मान्परित्यज्य
मामेकंशरणंव्रज अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुच १ तत्रैवच अपिचेत्सुदुराचारोभ
जतेमामनन्यभाक् साधुरेवसमंतव्यः सम्यग्व्यवसितोहिसः १ पुनरेकादशस्कंधे स्वपादमू
लंभजतःप्रियस्यत्यक्तान्यभावस्यहरिःपरेशः विकर्मयच्चोत्पतितंकथंचिद्धुनोतिसर्वंहृदिसंनि
विष्टः १ तत्रैवच यदिकुर्यात्प्रमादेनयोगीकर्मविगर्हितं योगेनैवदहेदंहोनान्यत्तत्रकदाचन
योगास्त्रयःज्ञानकर्मभक्त्याख्याः अन्यत्पलंप्रायश्चित्तादि इतिश्रीसंप्रदायप्रदीपेश्रीविलस्वामि

७

स्पात्रे बिल्वमंगलवर्तौ श्रीवल्लभदीपशिखेतन्मार्गपथिकजनतमोनिहृत्तौ प्रथमं प्रकरणं १ उक्तं
च उत्पन्ना द्राविडे भक्तिर्वृद्धिं कर्णाटके गता कचित्कचिन्महाराष्ट्रे गुर्जरे प्रलयं गता १ पृथि
ह्विराज्यसमयात् किंचित् लोगतेद्राविडेषु कश्चिद्राजा बभूव येन धर्मेणाखिलं भारतं वर्षं
वशीकृतं तस्य राज्ञः सकलभारधौरेयः सचिवो ब्राह्मणो बभूव तस्य ब्राह्मणस्यात्मजः श्री
विष्णुस्वाम्यासीत् स च श्रीशुकवागमृताब्धेर्दोः श्रीगोपीजनवल्लभस्यांश एव यो यद्देशाः
सतं भजेदिति शास्त्रात् साः स्तान् रूपेण कामदेव वेदार्थविषया चतुर्भुवः बुद्ध्या च बृहस्प ७
तिः धनवान् यथा धनदः भोगवान् यथा पुरंदरः किमधिकं वेदोपवेदेतिहासपुराणो
पपुराणस्मृत्युपस्मृतिनिवेदांगसांख्यवेदान्तयोगधीमांसावैष्णवशैवतंत्रादि वेत्ता यथा कृष्ण

द्वैपायनः साहित्यवात्स्यायनादिषु च यथोक्तं पाद्मे यदा भागवतीं स्तुतिः स्थितो भवति वैतदा श्रोत्रे
न भगवान् विष्णुः स्वात्मानं स्पृजति स्वयं तमाश्रित्य जनाः सर्वे भक्तिभाजो भवंति हि मे पुंसस्तेभ
लीवर्दीयदाश्रित्य धर्मेति च चत्वारस्ते कलौ भाव्याः संप्रदायप्रवर्तकाः भविष्यंति प्रसिद्धास्ते
ह्युत्कले पुरुषोत्तमात् २ तस्य श्रीविष्णुस्वामिनः कदाचिन्मनसि विचारः समजनि कथमहं
पितुरधिको गुणे भविष्ये राजसेवया भविष्यामि संप्रति भूमंडले यदीश्वरो महीपो राजास्ति ता
दृशोन्यो नास्ति सचिवेषु राज्ञः सममपि तानुग्रहपात्रं यथास्ति तादृशः सचिवोन्यो नास्ति अतः
सर्वोपि वेषु देको पि मृगः तर्हि राजराजो धनदः सेव्यः स्यात् सोपीद्रानुयायी तर्हि इंद्रः इंद्रो
पि रुद्रानुवनः अन्येपि यमाग्निवरुणादयः तर्हि रुद्रः सेव्यः तस्यापि पितृत्वे मान्यत्वे ब्रह्मा।

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA-390 002.
ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA-390 002.

स्तितमब्रवीन्महादेवोसीतिश्रुतिः तर्हिब्रह्मैवेश्वरः सेव्यश्च ब्रह्मापिश्रीनारायणनाभिपद्मलब्ध॥॥॥
॥॥॥॥॥॥जन्माश्रूयतेतर्हिनारायणएवसर्वेश्वरइतिसिद्धं सोपिमत्स्यावतारैरवतीर्यात्मानेमन्या
८ मानइवजपन् यजन् भजन्नुध्यायन् श्रूयतेचपुराणेषुपरतेरइव अतः सर्वतोधिकोहंकेसर्वेश्वरे
स्वरमाराध्यभविष्यामीतिनिश्चयेनजगामपुनः पुनश्चविचारवान्प्रभूतवेदमूलशास्त्रेषुगरी
यांसोवेदाःवेदेषूपनिषदः उपनिषत्सुबृहदारण्यके माध्यंदिनीयाशाखातसर्वासाधारणास्व
तेः एतोयजुर्वेदस्योपनिषदियः सर्वेश्वरइत्युक्तः समेप्रभुः सेव्यश्चसर्वाश्रयमात्मासर्वस्ववशी
सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदंप्रशास्ति यदिदंकिंचनसाधुकर्मणाभूयान्नोवाकनीया ८
नेषभूताधिपतिरेषलोकेश्वरएषःलोकपालः॥ससेतुर्विधरणएषांलोकानामसंभेदायइतिसत्य

कासंसत्यैल्पसंकल्पेसर्वज्ञेसर्वशक्तिचिंत्यानंतशक्तिभक्तवत्सलेकृत्नाहंजगदीश्वरंसर्वाण्युपनिषदो
पदे वदेति परंतुतस्यनामरूपादिनज्ञायते कथंतेभजामीत्यपद्यते राजसेवामहाराजो
पत्ताकेणैवभवति अत्रोपनिषद्युक्तेसर्वेश्वरेनामरूपाभावेकाभक्तिः कीर्तिश्च भवतनामयथा
महाराजसेवकैर्महाराजोपचारविधिनामहाराजः सेव्यते तथाऽदृष्टरूपमपिजगदीश्वरंयदि
चविष्यामि सर्वज्ञोभक्तवत्सलः कृपालुः श्रुतौपठितः अतोदर्शयिष्यतिस्वरूपंहृदिइतिनि
श्चित्यभजनारंभंकृतवान् मत्स्वामिनोर्थेरमहाराजतांबूलासनशय्यासिंहासनछत्रचामरपा
दुकाचंदनकर्पूरकस्तूरीमृगंधागुरुजलपानपात्रभोजनपात्रधूपदीपनीराजनशयनभोजन
विहारःसभास्थानरथनरवाहनाश्वगजजवनिकावितानक्रीडोपस्करादिसर्वंऽमितिचकार

अरुणोदयादारभ्यक्रमेण महाराजसेवकन्यायेन प्रतिबोधदंतधावनकेशमार्जनादिमहाभोगपर्य्यं
तं अनुदिनं चकार एवं भगवान् नरहरिति अगृहीते भोजनादौ पश्चात्तापं चकार पश्चादिति निश्चि
५ तवान् अहो यावन्मत्कृतां सेवां सानाडुत्वान् हरि ति तावदहं न भोक्ष्ये न पयः पाः स्यामि अनुदिनं
भगवद्दर्शनप्रश्ने जनादिकल्पिते भगवता न गृहीते जलोपायेतन्निपतिस्म एवं षड्दिनान्यतीतानि
कृते अस्थिषु अभवेषु प्राणत्यागः त्रेतायां मांसापगमे द्वापरे रुधिरव्यये कलौ अन्नाद्यभावे एवं
कलिकलेवरत्वात्तत्तस्थां शरीरे ग्लानिमवाप ततः स्वगतमिदमाह अहो प्रकृतिवाक्यप्रमा
णेन ईश्वरोऽस्त्येव सर्वज्ञः कृपालुः पतितः कथं मत्कृतां सेवां न गृह्णाति तस्मात्केनापि मे पि मयि पा ५
रीरदोषो वर्त्तते अतः परं तेषां नापि दिनमेकं सेवां करोमि यदि भगवान्न गृह्णाति तदाग्निप्रवेशं

करोमि इति निश्चित्य सप्तमे दिवसे भजनं कर्तुमारब्धे यथास्थाने सेवासाधनानि स्थाप्य कपाटेपिधाय
बहिः स्थितः ततो गृहीते भगवानाविर्बभूव सेकजनेन सह शृंगारस्थाने शृंगारसाधनाभिः स्वीकृ
तानि ततो भोजनस्थाने भोजनं कृत्वा ते शयनस्थाने शयनमपि कृतं बहिः स्थितेन विप्रस्वामिना
ज्ञाते द्वारमुद्घाट्य गृहीतः समागते भगवंतं ददर्श सतेवयसि कैशोरे विहितभुजं पीतवाससं नवी
ननीरदश्यामे पद्मगर्भारुणोदरे रुचिरोष्ठपुटंन्यस्तवेणुवादनतत्परः शिखिपिच्छावतंसेन
शोभितं वनमालया हारकेकनकेयूरमुद्रिकाभिरलंकृते सुंदरे निम्ननाभिं च हेममेखलयावृ
ते स्फुरन्नूपुरे केकारं वीरश्रीवसिके मुदा कालीनाथ शृंगारे रसमूर्त्तिमनोरमे पीतोत्तरीयसंवी
तं त्रिभंगललिताकृतिं गले मंडलसंसर्गिलसत् कांचनकुंडले तेगगुल्फाहृणनखप्रांतदीप्ती

तिनिश्चितं पाणिपादतलेपद्मं पत्रारुणतयाङ्कितं मध्यदक्षिणतो देव्योतप्तकांचनसंनिभे वयोरु
पगुणोपेते रङ्गावाचमुदाङ्किताः भगवान् साम्बरङ्घ्यात्वासंगुणजाने मयोपनिषद्क्त सर्वेश
१० रस्यार्थे याःसेवाकल्पिता असौनिर्गुणा त्वयास्वीकृतासतत्कृत्यसेवावैदिकतांत्रिकमार्गेनये
त्वो इदविधरूपं भजेति नममतत्र सर्वेषांबुद्धिः अत्रसंदेहतिराकरणेत्वयेवभवति संश
यंछिधि शास्त्रसामान्यात्मानेप्रमाणीकुरु यच्चात्मांप्रणमामि श्रीभगवानुवाच सौम्यम
त्तोन्यईश्वरस्तवकोप्याश्रितेनतत्कृतासेवानगृहीता मयाचोत्तरधर्मेणगृहीताचेत्वर्हिकथंन
ह्रविता अर्पयापितंविज्ञापय योमेदंडंदास्याति इतिश्रुत्वापुनर्भगवानाह देवसर्वात्मनात्वोपश्य १०
न्तोस्मि शास्त्रसमन्यास्वकीयेमाहात्म्यंकथय श्रीभगवानाहसौम्यसर्वे सर्वेश्वरोहमस्मि तावद्

पनिषत्संमत्याकृष्णकृस्नायंसात्वात्ब्रह्मेतिश्रुतेः तथाथर्वनेपनिषदि कृस्नोवैपरमंदैवंगोविंदा
त्मम्मूर्त्तिंभजेतिश्रीगोपीजनवल्लभोभुवनानिदध्रेइति तत्रैवच अनेजदेकमंनसोजवीयोनैनतद्देवा
आप्नुवन्पूर्वमर्षीत् तत्कृस्नएवपरोदेवस्तंध्यात्तेनमेत्तंभजेदिति श्रुतेः अन्यच कृषिर्भूवाचकः
शब्दोनश्चनिर्वृतिवाचकः तयोरैक्यं परंब्रह्मकृस्नइत्यभिधीयते यथोक्तंबृहद्गौतमपुराणे उक्त
स्थानेलेखग्वादीनां प्रतिब्रह्मणोवाक्यानि षष्ठीवर्षेत्यादिश्लोकाः पुनर्भगवताविस्तरा
पितं प्रस्तुतं सौम्यसमसर्वेश्वरप्रतिपादकानिवाक्यानिवेदादिषुसंतिनवाविरुद्धस्तामाद्
संतिवद्वयः शाहब्रह्मणिनिष्ठाताः पंडिताः सगुणेमूर्तेदर्पणेलिंस्त्वत्मेतेतिनेतिविहायनिराका
रंचिन्मंत्रेतपतियोति तेरेवसिचेश्नेनंतवलोकरूपादितेषांमतेपूर्वपतेभविष्यतितदावाश्रुतेः

शास्त्रीयः तन्निवारणायसौम्यतेषांस्वार्थवदान्तोपरंतमायावादिनोसुराः सर्वथास्त्वन्नदहमेव तेषा
मसुराणांमन्नपरास्युवीकरणार्थंनछ्यास्वेमुदिछैयैवप्रावर्त्ततेतेनुजगदवित्यंते कथंसत्यस्वरूपा
११ न्मनोजातमनित्यंभवति ततोवादमानिनायतेयेनेजातानिजीवंति यत्प्रवंत्यभिसंविशंति तद्ब्रह्मे
तिश्रुतेः कारणानुमेयंकार्यंभवतीतिन्यायः तस्मात्सत्यस्वरूपाजातेसत्यमेव परंतमान्माया
मोदितमजयोसुरप्रकृतयोद्यैनन्मजश्र्वत्तपयतिप्रपंचनित्यकरणेभगवद्भजनसाधनंफलं
चनित्यंभवति तस्मिन्प्रवृत्तेज्ञातेभक्तौदृढाश्रद्धाभवति एतदर्थेरुवादिनोब्रह्मवादिनः सर्वं
खल्विदंब्रह्मेतिश्रुतिश्रुतिप्रामान्यात्प्रपंचंनित्यमन्यंते यथाग्निष्टोमेनस्वर्गकामोयजेताकर्म
णाचित्तशुद्धिर्भवति चित्तशुद्ध्यात्मज्ञाने ज्ञानेनैवात्मप्राप्तेर्मोक्षइतिस्वर्गकाम इतिमोक्षफलेदा। ११

र्शितं तदेशाचनार्थफलश्रुतिरितिनितेषांसिद्धांतंप्रपंचसत्यकरणेपितद्वत् एवंशास्त्रंभवत परंप्र
पंचोनित्यएव मायेत्यसुराइतिश्रुतेः श्रीभगवद्गीतासु आसुरंप्रकृतीनांलक्षणं असत्यमप्रति
ष्ठंतेजगदाहुरनीश्वरंचतुर्भुजाद्याकारैर्मयादेवासुरविरोधेषुमयादेवानांपक्षपातः कृतः अत
श्चतुर्भुजाद्याकारेषुअसुराणांद्वेषः निराकारंप्रतिष्ठंते सोहमस्मीतिमन्यमानाः हिरण्यका
शिपुकंसवेतपौण्ड्रकादयोमन्नोन्योजगदीश्वरोनास्तिइतिवदंतिसमसुराविष्टादेववाख्यरघा
येपिसोहमस्मीतिवादीनिषांस्त्राणपाश्रितानिश्चयेकृतयंतः अथयेकेः वलंदैवीप्रकृतिगतास्ते
दासोहमस्मीतिमांभजंति यथोक्तंश्रीभगवद्गीतासु महात्मानस्तुमांपार्थदैवीप्रकृतिमाश्रिताः
भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययं १ यावदविद्याबुद्धस्तावज्जीवत्वं अविद्यानिवृत्तौजीवोब्र

ह्येवभवति अतोयावद्द्वैतंतावज्जीवेश्वरयोर्भेदोमांते जीवभावनिवृत्तेएकमेवेतिमायावादिमतं अनित्यो
प्रपंचोनित्यंब्रह्मेतिचसगुणब्रह्मोपासनयाभक्त्यापिमुक्तिरेवपुरुषार्थः निखिलमपिभक्तिपाद्य
१२ मुक्तिसाधनंमन्यंते नैतन्मतमस्माकं ब्रह्मवादिनांजीवचेतिवृत्तेपिब्रह्मणोन्दरूपविभागेनोपाधि
पतीसेवकसेव्यतयोभेदएवमुक्तावपि अत्रह्यविमासयुनादतिऋचः प्रमाणं इतिश्रुत्वाविष्णु
स्वाम्याह भगवद्भिःसंशयोहमस्मि त्वमेवसर्वेश्वरेश्वरः पुनर्भगवानाह सौम्ययन्मनसीप्सि
तंतद्ब्रूहि विष्णुस्वाम्याह श्रुतिषुभक्तिशास्त्रेषुप्रपंचस्यमिथ्यात्वंवस्तुतोजीवेश्वरयोरभेदत्वंट
प्रपते तत्किं भगवानाह तत्सत्यंपरंमिथ्येतिपदंवैराग्यार्थंवस्तुतोजीवेश्वरयोरैक्यंशोकमोह १२
भयादिनिवृत्तयेपठितंतत्रकोमोहः कःशोकएकत्वमनुपश्यतइतिश्रुतेः अहमानंदमात्रक

रपादमुखोदरोगुणत्रयातीतोलगादपुत्तमः पुरुषोत्तमएवमहंक्रामत्समामस्समर्थर्मामदंशाएव
नतजीवत्वंतेषु दृश्यमानभेदोप्यभेदएवसेव्यसेवकलीलयाहमेवसदावर्ते अथमयायत्कार्यं
तद्ब्रूहि ऽविष्णुस्वाम्याह देवअनेनैवस्वरूपेणसपरिवारस्त्वमत्रैवतिष्ठ यथाराजसेवकवत्त्वां
परिचरेयं श्रीभगवानाह संप्रतिकलिकालोवर्तते नदेवतासत्वंतर्हिकर्थंमे देवोत्तमस्य
अतोमत्प्रतिमांकारय अस्मिन्नेवपुरेविश्वकर्मांशः शिल्पकर्ता असौमांदृष्ट्वाममरूपसमां
मत्प्रतिकृतिंकरिष्यति विष्णुस्वाम्याह देवएवंचेतर्हिवैदिकनोत्रिकोणदेवालयप्रतिष्ठास
कलीकरणादौकलिकालेदेशकालपात्रद्रव्यश्रद्धासंपदादिविधिः कथंपूर्णोभवतिविष्णुन
त्वैकथंविश्वासः पुनर्भगवानाह दृष्टमात्रामत्प्रतितिः सात्वादहमेवमंतव्यः सेव्यश्च विष्णु

स्वाम्याह एवंकृतेमत्कृतंप्रशास्त्रीयंपाखंडंवेदवाह्यंमन्यंतेमहाराज पुनर्भगवानाह यथामेत्वन्यास
प्रतिष्ठादौकृतेप्रतिमायांवेदब्राह्मणवचनेनदेवतासान्निध्यंकरोति तथाकेवलेनप्रेम्णादेवता
१२ सान्निध्यंकरोतीतिवेदवाक्यानिसंति सहोवाचयाज्ञवल्क्यस्तस्मादात्महितायप्रेम्णाहरिंभा
जेत्वचसातन्नामानिकीर्तयन् इतिश्रुतेः नदेवोविद्यतेकाष्ठेनमन्त्रवचनचाश्मनि भावेहिवि
द्यतेदेवतस्माद्भावोहिकारणं केवलेनहिभावेनगोप्योगावः खगामृगाः इत्येकादशस्कंधे रु
ष्टेनहिरण्यकशिपुनाक्वास्तितवस्वामीत्युक्तेप्रह्लादेनसर्वत्रास्तीत्युक्ते पुनर्हिरण्यकशिपुना
कस्मात्त्वंभेनदृश्यतइत्युक्तेहरिःस्तंभात्प्रादुरासीत् तत्रकोमंत्रः काप्रतिष्ठाकिंसकलीकर १२
णकेवलेभक्तिभावएव केवलेप्रेमभावहीनानांवैदिकीतांत्रिकोक्तमार्गोधिकारः मद्भक्तोयं

यंमार्गः श्रीभागवतोक्तएव अतःफलमार्गोयं निगमकल्पतरोर्गलितंफलं श्रीभागवतमुच्यते
अतोयंमार्गोवैदिकएवननुपाखंडः नप्रशास्त्रीयश्च इतिश्रुत्वाविश्वस्वामिनासूत्रधारमाका
रयित्वासाक्षाद्भगवंतंदर्शयित्वाप्रतिकृतिः कारितापुनर्भगवताविश्वस्वामिनेप्रत्युक्तंसौम्य
भगवद्गीताश्रीभागवतेमेपास्ते अहमेवएकएवमहाराजोपचारविधिनासेवाएवकर्मय
स्त्वंसंप्रदायाभूत्वायशोदागोपीजनवद्वादिवत्परिचरिष्यति सांप्रतिमारूपमपिसाक्षान्मा
त्वातत्कृतांसेवांपुनर्ग्रहीष्यामि यथादशमस्कंधेश्रीभागवते गताध्वनः श्रमौतत्रमज्जना
न्मर्दनादिभिः नीचीवसित्वारुचिरादिव्यस्रग्गन्धमंडितौ जनन्युपकृतंप्राश्यस्वाद्वन्नमुपला
लितौ सविपश्चल्लपाप्यायोसवेसखुपरूस्रजे श्रीभागवतोक्तोयंसेवामार्गः वैदिकतांत्रिवि

अनन्तानवेदान्तसांख्ययोगवर्णाश्रमधर्मादियोभागवतेदृष्टपंजे नेसर्वभक्तिसाधनान्येवरुक्तो।
गरीयसीभक्ति गीताभागवतयोफलेतात्पर्येच इत्युक्त्वाभगवानंतर्हिज अथविष्णुस्वामी
१४ भगवदुक्तेक्रमेणानुदितसेवांचकार तेनकृपयाशिष्यसंग्रहोपिकृतः येनानुगृहीतास्ते
श्रीगोपीजनवल्लभंप्राप्ताः विष्णुस्वाम्यथलोकसंग्रहनेवर्णाश्रमधर्मवेदार्थविदेडीय
तीभूत्वाभवगवद्भक्तिंगतः इतिश्रीसंप्रदायप्रदीपेश्रीविष्णुस्वामिचरितंद्वितीयप्रकरणं
अथविष्णुस्वामीसंप्रदायेविल्वमंगलनामाबभूव विल्वमंगलौद्वावभूतां उत्कलदेशा
द्वितीयश्चयस्याद्वैतरसनश्लोकसंख्याकंस्तोत्रंश्रूयते एकः काश्यपां एकोद्राविडेच द्रावि १४
डदेशीयोविष्णुस्वामीसंप्रदायी काशीवासीद्वितीयेजन्मनिजयदेवनामाचबभूव येनश्री।

गीतगोविंदग्रन्थंकृतं प्रथमेमाधवानलः चतुर्थेजयदेवः कर्मकंदला शाखिकला काश्यपा
वेश्या पद्मावतीतिक्रमादारभ्य श्रीगोपीजनवल्लभाख्येतत्वे इयोरथेकेमन्येविल्वमंगले वि
ष्णुस्वामिमार्गप्रशासति शिष्यतयावहवोगोपीजनवल्लभतत्वविदोवभूवुः तदाभगवान्तत्व
ज्ञानेऽनधिकरणेजनाः चात्मपुराणेनीपारायणिकीकथामनुसस्मार अत्रांतरेश्रीमहादेवः
कैलासशिखरेशिखरेसिद्धवटतरुतलेरत्नवेदिको व्याघ्रचर्मासनेउपविश्य श्रीपुरुषो
त्तमंसमाधिनाचिंतयामास समाधौभगवान् श्रीमहादेवंप्रत्याहयथोक्तंपद्मपुराणे द्वा
परादौयुगेभूत्वाकलयामानुषादिषु तदेवपुराणादिषुमपिमत्वावतितीर्षुर्वभूवएतस्मि
न्नेतरेदाक्षिणात्यजनपदेकश्चित्विवभक्तोब्रह्मणोवभूव सोयनपल्पः इह्वसतस्यशिवमा

णधयतः शिवालयेशिवश्चात्मानंदर्शयामास वरंब्रूहिप्रसन्नोस्मीत्युवाचपुत्रंदेहीतिब्राह्मणस्तमब्र
वीत् पुत्रादन्यंवरंवरय पुनस्तेनोक्तंपुत्रंमेदेहि तदन्यन्नवृणे पुनः शिवेनोक्तं एकोद्वादशव
१५ र्षायुः अपरः पंचाधिकशतवर्षायुः तयोर्मध्येपुत्रमेकंवृण द्वादशवर्षायुः सर्वगुणसंप
न्नोभविष्यति तदितरोमहाजडोभविष्यति ब्राह्मणोब्रवीत् देवतावत्स्थातव्यं पत्नींपृष्ट्वाया
मिशिवेनोक्तं हेद्विजगच्छ स्थितोस्मि ततोगृहेगत्वापत्नींपृष्ट्वासमायातः आहच देवसर्व
गुणसंपन्नंपुत्रंमेदेहि शिवोब्रवीत् अहमेवास्यपुत्रोभविष्यामि ततोगौर्यब्रवीत् तवसे
वार्थमहमवतरिष्यामि ततस्तद्ब्राह्मणपत्नीगर्भंदधार गर्भधारणाद्दशमासेषुपूर्णेषुपु १५
त्रंजनयामास शंकरदानत्वात्पिताशंकरइतिनामचकार ततःशुक्लपक्षउडुपइवाशुव

वृधे संस्कारक्रमेणोपनयनमवाप गुरोः सकृन्निगदमात्रेणवेदान्सांगानधीतवान् शास्त्राणिच
स्वयमेवज्ञातवान् जन्मदिनादारभ्यमहाकविरभूत् क्वचित्पक्षिंस्तौतिक्वचिच्छिवंच विस्
मपिक्वचित्तावद्देवताः साक्षात्भूत्वावरान्ददुः अणिमादयः सिद्धयस्तद्वशोऽभवन् कस्य
चिद्ब्राह्मणस्यगृहेवतीर्णागौरीतेनविधिवद्विवाहिता गृहस्थेनतेनत्रैवर्गिकोधर्मःप्रवर्ति
तः श्रियैश्वर्यप्रजेशुभ्यउपासनाकाण्डंविस्तारितंत्रिकालज्ञानवत्वात् सर्वोपिमनुष्यलोक
स्तद्वाक्येस्थितः ततस्तस्यजन्मतएकादशवर्षाण्यतीतानि प्राप्तेद्वादशेवर्षेपितरंमाह हे
पितः अस्मिन्नेववर्षेकिमप्यनिष्टंभावि अतः काश्यांयास्यामि ततः पत्न्यासहतेनोक्तं आवा
मप्यायास्यावः ततः शंकराचार्यः सर्वान्शिबिकास्वारोप्यपत्न्यासहकाश्यांजगाम यदाका

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA - 390 002.

श्रीमठं प्रविष्टस्तदा कालज्वरः समजनि ततो मणिकर्णिकायां स्नात्वा श्रद्धेपथेन त्यक्त्वा प्राणानुत्ससर्ज
तदर्द्धपथे यथा निमग्ना नाथ भवार्णवे तस्थिरा मया यायेत इवासि लब्धः तदनन्तरं तत्पिततनयो महादुःखा
न्वितो विलेपतः तत्परिदेवनं श्रुत्वा गौर्यसंभ्रान्ता दयान्विता सीत् पथोन्नराद्धे गौर्या पठितं तथथा
त्वयापि लब्धं भगः गवन्निदानीमनृतमेपात्र मिदं दयायाः तच्छ्रुत्वा शोकरो जीवितमवापपली
प्रत्यब्रवीत् त्वया कथं मम जीवितं प्रार्थितं जीवितोपि प्रव्रजिष्यामि ततस्तेनं संन्यस्तं कुटीचर
बहूदकहंसपरमहंस इति चतुर्थासन्यासिनः मद्विरामत्तवत् कटितटात्तेनवस्त्रं विस्त्रंसितं ना
लायते यावत्तावत् शिखासूत्रेन त्याज्ये काषायवस्त्रमपि न धर्म्यं इति श्रुत्वा सधर्म्माः पठिताः
यावत् शिखासूत्रे तावत्वेदवान्सुरूपः शिखासूत्रयोर्वेदोपि त्यक्तः वेदे त्यक्ते श्रीनारायणः त्यक्त

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA - 390 002.

एव पश्चात्पाखंडोभवति पुराणपुरुषोत्तमेन जनानुमहिमख्यानुकुरु इति शिवं प्रत्युक्तं तदेवावतारप्रयो
नेमत्वा शिखासूत्रे परित्यज्य काषायेवासः परिगृह्य एकदंडी बभूव तदनन्तरं छिष्यप्रशिष्यत्वेनब
हवो भवन् यथोक्तं भगवद्गीतासु यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणं कुरुते लोक
स्तदनुवर्तते तदनु अथातो ब्रह्मजिज्ञासेत्यादि व्यासस्सूत्राणि उत्तरीयमीमांसा कर्तव्या व्याख्याता
निश्रुत्यर्थविचारे मायावादतत्ववादौ अनादी स्तः मायेत्यक्षरा इति श्रुत्युक्तत्वात् मायावादिमतमा
स्वबमेव यत्र निरीश्वरसांख्ययोगवेदांतज्ञाने प्रतिष्ठितं महात्मानस्तु मां पार्थेति भगवदुक्तं तत्व
वादिमतं एतस्मिन्नंतरे गुर्जरदेशे अणहिलपत्तननामधेये कश्चिद्राजा बभूव तस्यात्मजः कुमार
पालः नामासीत् तेकश्चिज्जैनः श्वेतांबरो हेमसूरिनामा पाठयति स्म एकदा तेन राजकुमारेण रात्रेस्व

तस्यैयामेसंपूर्णचंद्रमंडलंगलितमितिस्वप्नेदृष्टे जिनशालायामागत्यप्रबुद्धेनपाठकः पृष्टः संप्रतिमये
दृष्टः स्वप्नोदृष्टइति ततश्रुत्वाहेमसूरिणादुर्वचोभिरसौरोषंप्रापितः ततोरुष्टः कुमारः स्वगृहंगतः
२ पश्चान्निद्रांनलब्धवान् राजपुत्रेणततोमनसिचिंतितं उदितेसवितर्येनेहंनिष्कासियन्मांनिरपरा
धंदुर्वचोभिराक्षिप्तवान् ततोहेमसूरिणास्वशिष्यंप्रेषयित्वासमानितः इतिपृष्टश्च भोराज
पुत्रयत्स्वप्नेत्वयादृष्टंतेनसप्तमेदिवसेतवराज्यंभविष्यति यदिस्वप्नदर्शनादनुनिद्रायातित
र्हिस्वप्नोनिष्फलोभवति अतोमयारोषितोसियदितवराज्यंभविष्यतितर्हिमदाज्ञावशेनत्वयाभा
व्यं भविष्यामीतिराजपुत्रः प्रतिज्ञातेततोगूर्जरदेशेशः कालधर्मप्राप कुमारपालोराजाब २
भूव ततोहेमसूरिवचनात्स्वदेशमध्येमीमांसकवैष्णवपाशुपतसांख्ययोगवेदांतसंन्यासिवेद

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajigunj Tower
BARODA - 390 002.

मूलानिषड्दर्शनानिनाशंनिनाय एतस्मिन्नंतरेश्रीसूर्यस्यांशोदेवप्रबोधनामागौडेप्रादुर्बभूव श्री
कृष्णद्वैपायनशिष्योनेमनिरितितस्यांशोभट्टाच्यः पौबभूव ताभ्यांकाश्यामागताभ्यांइतिश्रुतं
जैनपाखंडेनगूर्जरदेशेनाशितोवैदिकोधर्मः ततस्ताबुभावपिजैनवेषंविधायगूर्जरदेशंसमा
यातौहेमसूरिणास्वाश्रमंप्राप्तौदृष्टौ पृष्टौचकौयुवामिति ताबूचतुः श्रावांजैनदीक्षाकांक्षि
कौनवांतिः क्षमायातौ हेमसूरिराह युवांवर्षंयावत्प्रतीक्ष्यीयोवरीक्षांकृत्वाशिष्यौकरिष्या
मि ततोवर्षंयावत्ताभ्यांहेमसूरिसेवाकृता उत्पादितोविश्वासः ततः एकदाहेमसूरिणा
स्वेष्टदेवतापद्मावतीयाक्षिणीनित्यंसमाराध्यते तस्याराधनकालेतावपिमध्येनीतौ यथाको
पिनजानातितथामदिरापानेकर्तुमारब्धे ताभ्यांमदिरादत्ता देवप्रबोधेनभयीत्पीता भ

ट्टेनप्रतीलब्धं इत्युक्तं तत्वाऽनादृत्य हेमसूरिणा वेददेवब्राह्मणायलनिंदनमारब्धं तदाभट्टाचार्यस्यने
त्रयोरश्रुबिंदवः पेतुः लट्टदृष्ट्वाब्राह्मणोयमितिहेमसूरिरुवाच अहिंसैवनेनपापसनेमुक्त्वा
१८ ततोनायंहंतव्यः उपरितनभूमौरक्षणीयः यत्रासौरक्षितस्तत्रतस्यपुस्तकसंग्रहआसीत् त
त्पुस्तकान्यालोकयताभट्टेनज्ञातं जैनमंत्रैरनेनराजावशीकृतः राजगृहसमीपेहेमसूरिवा
सतिरासीत् तस्यराज्ञः काचिद्दासीजैनधर्मपराङ्मुखीवर्ततेस्म सानित्यंप्रातिग्रामार्चीकृ
त्वाभुंक्तेस्म तयानिक्षेपकदाप्यचार्द्धंपठितं किंकरोमिक्वगच्छामिकोवेदानुद्धरिष्यति तच्छ्रुत्वा
भट्टाचार्येणोत्तरार्द्धंपठितं माविषादवरारोहेभट्टाचार्योस्मिभूतले १ एवमुक्त्वातस्मादधः १८
पतितः यदिवेदाःप्रमाणंस्युः तर्हिपतनेमरणंमास्तु यदीतिसंदेहवचनेनएकमक्षिविनि

र्गतं तदनुयथाऽकोपिनजानातितथापतनेहर्निशंचचार एकदाकस्मिंश्चिद्दारामेरहसितुलसी
वृक्षोदृष्टः तत्रलग्नस्थितः सायंकालेपुष्पवणिक्समायातः सतुलसीपत्रंगृहीत्वापुनः सवि
हितेकृत्वानिर्गमिष्यन्नासीत् तदाभट्टेनगृहीतः आहच भोमाताकारयोजैनादन्यंधर्ममाचरति
सस्कुटुंबोराज्ञाहन्यते तत्कथय कस्यार्थेयंतुलसीतरुः पुष्पवणिक्आह जैनेदयैवमा
त्वा त्वमपिजैनोसि अतोराजकुलेननिवेदनीयंभट्टआह सत्यंवदकोपिवैष्णवोस्ति सशपथेन
कथयिष्यामि पुष्पवणिक्आह अस्तिराज्ञःपालका भट्टआह मदीयंलिखितपत्रंसवभार्याहा
स्तेनतस्यैदेयं दास्यामीतिमालाकारआह ततः किंकरोमीतिश्लोकंलिखित्वाप्रेषितवान् राज्ञ्यपि
तंदृष्ट्वातमाकारयामास ततोसौजैनवेषंकृत्वाराज्ञीगृहेगतः अन्यथागंतुमशक्यत्वात् मध्येगत्वा

ब्राह्मणवेषंकृत्वात्मानंदर्शयामासाततोराज्ञीतंधर्मतः पूजयामास ततोभट्टस्तद्गृहे ऽलक्षितो ऽवात्सी।
१५ त् पश्चाद्यादृशोंगदोहेमसूरिणाजैनवशीकरणमंत्रैः कृत्वाराज्ञोवाहोवशःकृत्वाद्दग्रामेगदंका
रयित्वाराज्ञीहस्तेनराज्ञोवाहोवद्धः जैनकृतोगृहीतः ततोवैदिकाभिचारतोराज्ञः कालज्वरः
समजनि तद्वेतर्हेमसूरिः पृष्टः कथंविज्वरोभविष्यामीति हेमसूरिराह दत्तेकालपुरुषदा
नेविज्वरोभविष्यसीति ततः कालपुरुषंनिमयिकमपिब्राह्मणवटुकंज्ञात्वायज्ञोपवीतादि
धारयित्वागायत्रीमंत्रंपुस्तकद्वाराकथयित्वातस्मैकालपुरुषदानंदापितं दत्तेदानेराजावि
ज्वरोबभूव ततोराज्ञोमनसिविचारः समजनि नब्राह्मणसमंकिंचिदस्ति येभ्योदानेदत्तेवि १५
ज्वरो ऽहमासं ततः पुनर्दैवप्रबोधाचार्यः कृतप्रायश्चित्तः श्रीनरसिंहप्रसादपत्तनपुरंसमायातः

ORIENTAL INSTITUTE ... BARODA

बहुभिः शिविकारूढैः तैः सरस्वतीतीरेपाकक्रियाकर्त्तुमारब्धा तदाहेमसूरिशिष्यैः समागत्ययथा।
न्नमपक्वंभवतितथामंत्रविधयाकृतं राज्ञीगृहात्भट्टाचार्योपिदेवप्रबोधाचार्यैः समायातः कुम्भ
लादिष्टं ततोभट्टाचार्येणनालिकेरफलान्यभिमंत्र्यतेषां पात्रैः प्रहितानीवप्रेरितानिजैनानांशि
रः स्वयुगपत्पेतुः तैर्हन्यमानैः समेत्यतेषांयाकेस्वमंत्रचारोहरीकृतः ततोद्वितीयेद्वितीयेदिव
सेकृताह्निकाः सर्वब्राह्मणाराजसभांजग्मुः तानागतान्विलोक्यराज्ञाप्रणामादिसत्कृतिः
कृता तेऽत्रहेमसूरिर्विस्मितोबभूव ज्योतिर्विदाब्राह्मणेनपंचांगंतिथ्यादिश्रावितं स्यात्तेनका।
थितमद्यामावास्याश्राद्धंकरणीयमिति तच्छ्रुत्वाहेमसूरिराह यद्यद्यपौर्णमासीनभवेत्तर्हियातह
स्तनिम्नगर्तेसपिच्छपुस्तकोऽहंप्रविशामि अन्यथात्वं त्यक्ष्यामीतिब्राह्मणैरंगीकृतं ततोहेमसू

रिणा स्वेष्टदेवतां पद्मावतीं स्मृत्वा तस्याः कुंडलं प्रार्थयित्वा निशायां खे गगने चंद्रबिंबवद्रचितं ततस्तद्ग्राम
वैजनाः पौर्णमासीं मेनिरे ततो देवप्रबोधाचार्येण स्वेष्टदेवतानृसिंहवचनेन ततमांसीं मेनिरे ततो
२० देवप्रबोधाचार्येण स्वेष्टदेवतानृसिंहवचनेन तत् शाक्तिकर्णकुंडलो वृत्तायग्रहे निवेदिते देव
द्वादशयोजनावधिः प्रकाशोस्यनाधिकः तदाहे विलोकिते न तत्थैव जाते ततो हेमसूरिणा
विचार्य गर्ते प्रवेष्टुमारब्धं ततो गर्ततलमध्ये हेमसूरौ सर्वैर्जनैः समेत्य धर्मस्य तत्त्वे पृष्टे तेन वक्ष्या
तेन वक्ष्यमाणमुक्तमिति हरिर्भागीरथी विप्रा विप्रा भागीरथी हरिः भागीरथी हरिर्विप्राः सा
रमेतद्वागये इत्युक्ते सद्भिर्गर्तेः पूरितः ततो ये पूर्वं नानादेशेषु गता ब्राह्मणादयस्ते पुनः समा
गताः ततो वर्णाश्रमलक्षणो धर्मः समवर्त्तत गुर्जरदेशे वेदाः प्रवृत्ताः परंतु पूर्वप्राप्तौ वैसव २०

शैवदर्शनेन प्रवृत्तो भट्टाचार्यस्य मीमांसत्वात् मायादिवेदांतस्यापि प्रवृत्तिरभूत् यदा भट्टाचार्यैस्ता
तं कुंडलमिदं पद्मावत्याश्चंद्रबिंबायितं तदायमीवतीमरसत्स्यैव सा प्राप्तो भूमावववलतारेति सा भ
ट्टाचार्यस्य सुताभूत् ब्राह्मणोपि शः सुरेश्वरनामा कश्चिद्भट्टस्यांतेवासी आसीत् सा तस्मै पत्नीत्वेद
त्ता तया सार्द्धमसौ भट्टमतानुसारेण गृहाश्रमोचितकर्माण्यन्वहं चकार कार्पण्यं तद्वसतिरभूत्
ततो भट्टैः स्वमनसि विचारितं मया गुर्जरदेशे वेदमार्गस्थापनाय जैनशास्त्राण्यवलोकिता
नि पाषंडशास्त्रावलोकनेग्निप्रवेशाद्यैतिक एवः ततः प्रयागे समेत्याग्नौ प्रवेष्टुमारब्धं तदा
तत्र शंकराचार्यः समायातः विवदिषुरहमस्मि इत्युवाच तदा भट्टैरुक्तं त्वया कार्पण्यागतेष्वं तत्र
मम जामाता स्मि विवादं करिष्यतीति अहमग्नौ प्रवेक्ष्यामि ततः शंकरः कार्पण्यागतः सुरेश्वरभ

द्वैः सार्द्धंविवादंचकार सामर्थ्यस्यातत्पत्त्वेवकृता शंकरः पराजयंप्राप्तः पुनः गरुडसमोभवति स

वेश्वरः पराजितएकदंडीभवतीतिपणः कृतः भट्टमतन्मेडनेपायदानवैरत्वात् ततोविवादेना

२१ तेर्षीः करेणपराजितः सर्वेश्वरएकदंडीबभूव ततः शंकरोगोकर्णात्प्रत्यावृत्तेदक्षिणस्यां

दिशिजगाम तत्रगत्वाशिष्यचतुष्टयंप्रत्युवाच चतसृषुदिक्षुस्वःस्वामनार्हदैर्भवद्भिर्गत्वा।

सर्वत्रमायावादिमतेस्थापनीयो संन्यासः शिखासूत्रपरित्यागेएकदंडैव इतितत्रैःशिष्या

नामाल्लादत्ता तेरास्ताशिवसिः धृताप्रातः प्रयाणंभावि तेषांमध्येएकोमधुनामाभवत् सो

पिपांकराद्गृहीतसंन्यासः तस्यनिशिश्रीरामचंद्रः प्रादुर्बभूव वाक्यमाहच मयोत्वयानशं

करवचनेस्यातव्यं यतोभवान्हनुमदंशः त्वंवैष्णवसंप्रदायेवतीर्णः शंकरकृतव्याससूत्रभा २१

ष्यमुत्तरमीमांसालक्षणंसर्वपक्षीकृत्यतत्त्ववादिसिद्धांतानुसारेणपुनर्व्याससूत्राणिव्याकुरु त

त्ववादिसिद्धांतः स्वयमुपदिष्टः ततोसौशंकरदर्शितमार्गंविहायश्रीरामदर्शितमार्गेणवैष्ण

वसंप्रदायंप्रवर्तयामास शंकरमनेनतत्संप्रदायिनामतएवाद्यापिविरोधः इतिसमासतोम

ध्वाचार्यसंप्रदायोत्पत्तिः विल्वमंगलतः पश्चात्सर्वद्राविडेकस्मिन्रामानुजइतिब्राह्मणो

बभूव तस्यलक्ष्मीसमाराधयतोलक्ष्मीप्रसन्नाभवत् वरंवरंब्रूहिइत्युवाच तेनोक्तं देविभा

गवद्धर्मंवद ततस्तयागरुडश्चाहूतः ततोगरुडेनतस्मैनारायणीयः सिद्धांतः समर्पितः त

स्मात्संप्रदायः प्रावर्तत तेवैष्णवः अद्यापिदक्षिणस्यांदिशिप्रसिद्धास्तस्मिन्नेवसंप्रदायेकेचि

द्विहरोपासकाः अगस्तिपरशुरामकृताः श्रीवैष्णवाः श्रूयंते इतिरामानुजसंप्रदायोत्प

त्रिः अस्ति दक्षिणापथे पांडवपुरं नाम नगरं तत्र श्रीविठ्ठलाख्यो भगवत्स्वरूपे तस्मिन् पुरे कश्चित् त्रिंबा
दित्य नामा ब्राह्मणो बभूव तस्मै श्रीः विठ्ठलेन स्वसिद्धांत उपदिष्टः ततः सोपि तत्सिद्धांतानुसा
२२ रेण स्वसंप्रदायं प्रवर्तयामास एवं श्रीविष्णुस्वामिरामानुजमध्वाचार्यनिंबादित्या इति चत्वा
रः संप्रदायप्रवर्तकाचार्या ज्ञातव्याः उपनिषद्गीताभागवतव्याससूत्रभाष्यं चतुर्भिः स्वस्वा
सिद्धांताविरोधेन कृतमस्ति निबंधश्च पृथक् पृथक् चतुर्षु संप्रदायेषु स्वस्वाचार्यकृतो नि
बंधो वर्तते यद्वाक्यतो नित्यनैमित्तिकभक्तिकार्येषु स्वस्वसंप्रदाये प्रवर्त्तंते यथोक्तं पद्मपुरा
णे चत्वारस्ते कलौ भाव्या संप्रदायप्रवर्त्तकाः भविष्यंति प्रसिद्धास्ते ह्युत्कले पुरुषोत्तमात् त २२
था एकदा मध्वाचार्यः श्रीपुरुषोत्तमायतने जगाम तत्र ये भगवत्सेवकाः ब्राह्मणास्तान् प्र

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA-390 002.

त्युवाच यूयमदीक्षिताः अदीक्षितैर्भगवत्सेवा न कार्या इति तदा तैर्विज्ञप्तं श्रीजगन्नाथस्याज्ञया दी
क्षां ग्रहीष्यामः तदा श्रीजगन्नाथेन मध्वाचार्यं प्रत्युक्तं सरोषं मदीयान् त्वं दीक्षितान् करोषि एते दी
क्षिता एव मध्वाचार्यो भगवंतं प्रत्याह अदीक्षितस्य वामोरु कृतं सर्वं निरर्थकं पशुयोनिमवा
प्नोति दीक्षाहीनो मृतो नरः इति शास्त्रे कथं उक्तं भगवानाह एतत्स्तोत्रादन्यत्र दीक्षिता एव वै
ष्णवाः अत्र मदिच्छयैव प्रधाना मध्वाचार्योप्याह के वैष्णवाः के अवैष्णवाः इति मया कथं ज्ञा
यते भगवानाह ये संप्रदायचतुष्टयांतः पातिनस्ते वैष्णवाः मध्वाचार्य आह के ते संप्रदायाः
पुनर्भगवानाह एको विष्णुस्वामी द्वितीयो रामानुजः २ तृतीयो मध्वाचार्यः ३ तुरीयो निंबादि
त्यः ४ एतत्संप्रदायेष्वेते वैष्णवाः इति श्रीजगन्नाथवाक्यात् कलौ संप्रदायाश्चत्वारः प्रसिद्धाः

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA-390 002.

चत्वारउपसंप्रदायाः एकस्तैतन्यः २ द्वितीयः स्वरूपः २ तृतीयः प्रकाशः ३ चतुर्थोनंदइति ४ विष्णु
स्वामिनउपसंप्रदायस्तैतन्यः रामानुजस्योपसंप्रदायोनंदः मध्वाचार्यस्योपसंप्रदायः प्रकाशःऽनि
२५ वादित्यस्योपसंप्रदायः स्वरूपः इतिप्राच्याः स्वरूपप्रकाशौविछिन्नौकालेन एवंचवल्लिश्रा
चार्याभावात्शास्त्रव्याऽख्याननिबंधादिनवर्त्तते एवंमूलसंप्रदायोनंतः पातितएव परंतूर्वा
चार्यसिद्धांततोवैलक्षण्येनस्वरुचिवर्त्तनायसंप्रदायाइत्युच्यंतेगरीयसीकेवलमीश्वरेच्छा प्र
त्रसंप्रदायीदिङ्कोविचारः इतिश्रीसंप्रदायप्रदीपेविंऽस्णुस्वामिस्वरूपाचेविल्वमंगलकर्तृश्री
वल्लभदीपणिविसर्वसंप्रदायोत्पत्तिप्रकरणंतृतीयं ३ श्रीवल्लभोयदिमदीयहृदीस्थोऽस्ति २५
श्रीगोपिकाहृदयपल्वलराजहंसः सत्येनतेनममवाचितदीयवृत्तंसर्वंप्रकाशमुपयातयथा

र्थतोत्र १ अस्तिदक्षिणापथेतिलंगाभिधोजनपदः यत्रब्राह्मणाः कलिंपराभूयवैदिकधर्ममनुतिष्ठं
ति यत्राग्निहोत्रयज्ञकुंडेषुहूविषिहूयमानेधूमधकाराच्छादितदृष्टिः कलिर्हरतरंपलायते य
त्राद्यापिवेदाः सवीर्यावर्त्तंते तत्रसकलब्राह्मणगुणालंकृतश्रीलक्ष्मणभट्टकुलकमलवि
काशमार्त्तंडः श्रीवल्लभाचार्यः प्रादुर्बभूव अहोकलिर्दूरतरंगतोऽधुनाधर्मोपिदृढिंगमि
तस्त्ववैदिकः भक्तिर्हरेसम्यगवर्त्ततेवमाकाशगणाहृयदीयजन्मनि १ एकदातिलंगदेशा
त् श्रीलक्ष्मणदीक्षितैः स्वज्ञातिभिः सहकाशींप्रासमागते यथोक्तंगार्हस्थ्यंपालयामास एत
स्मिन्नंतरेधर्मपत्नीगर्भंदधार ततःकाशीतः श्रीलक्ष्मणदीक्षितैः प्रयागंप्रतिप्रचलितंतत्रत्वा
त्वापश्चाद्दक्षिणंप्रतिप्रस्थातमारेभे मार्गेचंपारण्यवनेसप्तम मासीयोगर्भोविस्रंसितः वे

ऽनगर्य्यांसमागताः आनंदाविर्भावात्सर्वेषांहृदिप्रसन्नताजाता तत्रस्थित्वाभ्रूतेकाश्यपाः सकाशात्
परचक्रेनिहृत्तेस्यास्थंजाते तदालक्ष्मणयादीक्षितपत्नीकाश्यपाप्रत्यायेतीयत्रगर्भोसतःस्तत्रायाता
२४ स्थानेप्रसुवाच तांसर्वेतिष्ठंतपश्यामिअत्रगर्भोस्त्युक्तः तस्यकीदृश्यापाहृत्तोतः इत्युक्ताभर्त्री
सार्द्धंदिवृत्तःप्रस्थिता तत्रगत्वामहाज्वालाविराजितेतत्राग्निपुंजेदृष्टवातः आहतत्त्व अहो
महद्विचित्रमिदंलक्ष्मणनाश्यपआमगर्भोस्मुक्तः ततोग्निःप्रज्वलत्निवर्तष्यते अतःअमानुषोयंग
र्भोजीवन्निवतिष्ठति अथैननीत्वागृहंयास्यावः ततःस्वकुलदेशारीत्याजातकर्मादिसंस्का
रांश्चकृतः तदनंतरंशिशुंनीत्वागृहंप्रस्थितौ गृहंसमागम्यसर्ववल्लभत्वात् पितावल्लभ २५
इतिनामचकार एवंक्रमेणपंचमेवर्षेजातेकृतोपनयनोवेदमधीतवान् तदातस्यामानुषी

प्रणोदृष्ट्वालक्ष्मणभट्टैःस्वहृदिविचारितं अहोसंप्रतिकलिकालः पुत्रोयंमेमहानुभावः कोयं।
भवतीत्यत्सहेतवेक्षीति सचिन्त्याग्निहोत्रशालायां भूमौशायेनेचकार तदाराजेयस्त्वात्पयामे
श्रीमदानंदमात्रकरपादमुखोदरादिभगवतश्रीपुरुषोत्तमस्वरूपमेवाग्निर्विप्ररूपः स्वप्नेप्रा
दुर्बभूव आहच अहमग्निर्भगवदाज्ञयातवपुत्रतांगतः तदनुभावेनिःसंदेहोभव इत्युक्त्वा
न्निरंतर्हितः ततस्वप्नवृत्तांतेनलक्ष्मणभट्टैः स्वलोकावादीत् तदनंतरंकियत्कालेगतेसतिलक्ष्मदी
क्षितैःकालधर्ममवाप्यततः स्त्याबलौकिकंपारयित्वाकालक्रमेणसांगान्वेदानधीत्यसर्व
शास्त्राण्यधीतवान् श्रीपाणिनीयव्याख्यांसमाप्यव्याससूत्रजैमिनिसूत्रगोतमचाणादक
पिलपातंजलीसूत्रव्याख्यांसमाप्यपौरुषेयांसमग्रामवलोक्यनातिप्रसन्नमनाबभूव ततःश्री

वल्लभोवैस्नवतंत्रेषोषतंत्रेप्राभाकरकौमारिलमौद्गलमतादिशास्त्राणिविस्नुस्वामिरामानुजमध्वाचार्य
निंवादित्यप्रोक्तं कृत्वादिभाष्यसिद्धांतेपविज्ञायकाः एषांतेषामप्रवृत्तिर्दक्षिणपथेतत्प्रवृत्तिं
२५ कृत्वाद्दक्षिणपथप्रस्थितः तत्रागत्वातानिसर्वाण्यवलोक्यविद्यानगरेसमापातः तदातत्रकृ
सनामाराजावर्त्तते तत्रमध्वाचार्यमार्गतिमिरनाशनप्रदीपः श्रीव्यासतीर्थनामायतीवर्त्तते
मायादीगजानीकनाशनेसिंहविक्रमः कृष्णद्वैपायनोव्यासोव्यासतीर्थः कलौयुगे तदाराजस
भायांमायावादितत्ववादिनोविवदमानयोः षडब्दान्यतीतानि तदाश्रीवल्लभेनश्रुतंराजसभा
यांविद्याविवादोस्ति ततोराजद्वारमार्गेसमागत्यद्वारपालकैर्दृष्टं ततोप्रलौकिकींप्रभांविलो
क्यराजानंप्रतिनिवेदितं पश्चात्राज्ञाज्ञागत्यविज्ञप्तिः कृता तदाराजसभायांप्रस्थितः तस्मि २५

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajiganj Tower,
BARODA-390 005.

न्विवादेमायावादिनातत्ववादीजितः तदाश्रीवल्लभोब्रवीत् मायावादिन्मयिजितेजितं मायावाया
हं त्वमप्येहिश्रीवल्लभैः सहतस्यविवादः समजनि श्रीवल्लभैर्मायावायप्रयासेनजितः त
तोराज्ञाश्रीवल्लभानांकनकेनाभिषेकमकंकारयाऽमास पश्चाद्विज्ञप्तिः कृतास्वास्मिन्नेतद्
